# Shri Lakshminrisimhastavana Stotram

# શ્રીલક્ષ્મીનૃસિંહસ્તવનસ્તોત્રમ્

## Document Information

Text title : Shri Lakshminrisimhastavana Stotram

File name : lakShmInRRisiMhastavanastotram.itx

Category : vishhnu, dashAvatAra, lakShmI, stava, stotra

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


August 4, 2025

*sanskritdocuments.org*

# શ્રીલક્ષ્મીનૃસિંહસ્તવનસ્તોત્રમ્

શ્રીગણેશાય નમઃ । શ્રીલક્ષ્મીનૃસિંહાય નમઃ ।
અથ ધ્યાનમ્ ।
લક્ષ્મીશોભિતવામભાગમમલં સિંહાસને સુન્દરં
સવ્યે ચક્રધરં ચ નિર્ભયકરં વામેન ચાપં વરમ્ ।
સર્પાધીશકૃતાન્તપત્રમમલં શ્રીવત્સવક્ષઃસ્થલં
વન્દે દેવમુનીન્દ્રવન્દિતપદં લક્ષ્મીનૃસિંહં વિભુમ્ ॥ ૧॥

નમોઽસ્તુ લીલામયવિગ્રહાય સ્વરૂપદૃષ્ટ્યા હતસદ્ભ્રમાય ।
નમઃ પરાનન્દપરાલયાય સ્વભાવસમ્પત્તિમહોદયાય ॥ ૨॥

નમો ગુણાનાં પતયે મહિમ્ને વિકારધામ્નેઽખિલકારણાય ।
નમો જગદ્ભાસયતે ગરિમ્ણે સતે ચિદાત્માકૃતયે ગુણાય ॥ ૩॥

ત્વમાદિરસ્યાસિ નિદાનમધ્યં વિશ્વાકૃતિસ્ત્વં પ્રલયો વિભુસ્ત્વમ્ ।
ત્વં સર્વયોનિસ્ત્વં સર્વયોનિસ્ત્વં સર્વશોઽસિ ત્વં સર્વશશ્ચ ॥ ૪॥

નમઃ પુરસ્તાદથ પાર્શ્વયોસ્તે પશ્ચાન્નમો તે બહિરીશ્વરાય ।
પૂર્ણાદ્વિતીયાય નમઃ પરાય અણીયસેઽનન્તચિદે પરસ્મૈ ॥ ૫॥

વહ્નેઃ સ્ફુલ્લિઙ્ગા ઇવ વારિભઝ સિન્ધોરિવૌઘા ઇવ વાસનાનામ્ ।
ભવન્તિ તિષ્ઠન્તિ વિયન્તિ યત્ર બ્રહ્માણ્ડસઙ્ઘાસ્તમજં પ્રપદ્યે ॥ ૬॥

યદીક્ષયા જનિરસ્યા પ્રમેયો વિભુર્નૃસિંહો વરદો મમાસ્તુ ।
યેનાહમસ્મિન્ વિવિધેઽત્રસર્ગે સમ્પ્રેરિતઃ કાલવિનષ્ટદૃષ્ટિઃ ॥ ૭॥

યસ્યાદેશાત્ સર્ગકર્મપ્રવૃત્તો ભૂત્વાપ્યહં કાલસમ્મૂઢચેતાઃ ।
સ પુણ્યવાચા મમસૃષ્ટીમેતામલઙ્કરોતુ પ્રભવિષ્ણુરીશઃ ॥ ૮॥

ઇહૈષ લોકે હ્યસમીક્ષ્ય બદ્ધો માયાગુણૈઃ કામયતે તુ કામાન્ ।
યચ્છન્નમુષ્મૈ ય ઇહાપ્રમેયો હરન્ત્યનન્તો નિમિષં પ્રસીદ ॥ ૯॥

નમો નિયન્ત્રે નિયમાલયાય નમો જગન્મોહતમોરુણાય ।
નમો નૃસિંહાય વિલાસધામ્ને નમઃ શિવાયામિતવિક્રમાય ॥ ૧૦॥

નમો મનોદૂરચરાય વાચાં વાચામનિર્દેશ્ય પદાય ભૂમ્ને ।
નમઃ સ્વભાસાખિલભાસકાય પ્રમાણમાત્રે જગદીશ્વરાય ॥ ૧૧॥

ઇતિ પદ્મપુરાણે શ્રીનૃસિંહસ્તવનં સમ્પૂર્ણમ્ । ૐ તત્સત્ ।

Proofread by M K Barman

---

*Shri Lakshminrisimhastavana Stotram*

pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*